International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 23-26
© 2016 IJSR
www.anantaajournal.com
Received: 21-11-2015
Accepted: 22-12-2015

**Mr. Subhankar Basak**
Research scholars (Ph.D)
Department of Sanskrit
Pondicherry Central
University

**Correspondence**
**Mr. Subhankar Basak**
Research scholars (Ph.D)
Department of Sanskrit
Pondicherry Central
University

# मानवसमाजे धर्मस्य प्रासङ्गिकता

**Mr. Subhankar Basak**

**सारः**

मानवाः सामान्यतया शान्तिपूर्णरूपेण समाजे जीवनयापनं चिकीर्षति । किन्तु वर्तमानयुगे मानवेषु चित्तेषु असत्यवचनं, हिंसाभावः, परद्रव्यग्रहणं, आतङ्कवादः इत्यादयः बहवः विषयाः दृश्यन्ते । यदि धर्मोऽनुसारेण मनुष्याः जीवनयापनं करोति तर्हि समाजं सुष्टः मार्गे प्रचलष्यति । मानवसमाजं सुष्ठभावेन परिचालनार्थं भिन्नमार्गाः दृश्यन्ते । यथा- योगदर्शने वर्णितः यमाः, भिन्ना भिन्ना नीतिवाक्यानि, उपदेशवाक्यानि इत्यादयः । परन्तु धर्मः तु विभिन्नेषु मार्गेषु प्रधानः ।

Keywords : मनुसंहिता, वेदाः, महाभारतम्, पुराणम्, विष्णुधर्मसूत्रम् ।

संस्कृतबाङ्मये धर्मशब्दः विविधेषु अर्थेषु प्रयुक्तो भवति । परन्तु धर्मशब्दः प्रायः मानवानां विशिष्टानि कर्तव्यानि महत्त्वपूर्णानि दायित्वानि आचरणस्य सुनिश्चितानि नियमानां अर्थनां सूचयति इति वक्तुं शक्यते । धृङ् धारणे1 "धारणपोषणयोरित्यस्माद्धातोः" मन् प्रत्यययोगे निष्पन्नोऽयं धर्मशब्दः । ऋग्वेदे केषुचित् स्थलेषु धर्मशब्दस्य पुंलिङ्गे व्यवहारः, केषुचित् स्थलेष्वपि नपुंसकलिङ्गे व्यवहारो दृश्यते*[1] । अथर्ववेदे धर्मस्य प्रयोगो धार्मिकक्रियाद्वाराऽर्जितस्यापूर्वस्यार्थे व्यवहारोऽस्ति-

ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च ।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ।।[2]

---

* क. पितुं नु स्तोषं महो धर्माणं तविषीम् । ( ऋग् 1.187.1). ख. इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।( ऋग् 10.92.2). ग. त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव । ( ऋग् 10.21.3). घ. तानि धर्माणि प्रथमान्यासन् ( ऋग् 10.90.16). ङ. प्रथमा धर्माः ( ऋग् 3.17.1). च. सनता धर्माणि ( ऋग् 3.3.1).

छान्दोग्योपनिषदि धर्मस्यापरः कश्चिदर्थो निष्पद्यते । यथा – त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमस्तप एवेति, द्वितीयो ब्रह्मचार्याचार्यकुलवासी,

तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् । सर्व एते पुण्यालोका भवन्ति ब्रह्मसंस्थोऽमृत्वमिति ।[3] अर्थात् गृहस्थधर्मः, यज्ञः, अध्ययनम्, दानम्, तापसधर्मः, तपस्या ब्रह्मचर्यधर्मश्च । ऋग्वेदमतानुसारं धर्मो नियमव्यवस्थाया आधारः । धर्मशब्दस्य पर्यायवाचिशब्दाः – पुण्यंश्रेयः वृषः प्रभृतयोऽमरकोषे ।[4] संस्कृत-हिन्दी कोषग्रन्थे धर्मशब्दस्य बहवः प्रतिशब्दाः दृश्यन्ते – कर्त्तव्यम्, अधिकारः, आचार-विचारः, न्यायम्, भक्तिः, नैतिकता, नीतिशास्त्रम्, चरित्रम्, स्वभावम्, चरित्रम्, यज्ञम्, इत्यादयः ।[5]

श्रीमद्भगवद्गीतायां धर्मशब्दः भिन्नेषु अध्यायेषु बहुवारं प्रयुक्तः । परन्तु प्रायतः सर्वत्र प्रयोगेषु प्रसङ्गभिन्नता विद्यते । यथा- धर्मक्षेत्रे, जातिधर्मः, कुलधर्मः इत्यादयः ।

- पुण्यकर्मणः वाचकोऽयं शब्दः ( धर्मक्षेत्रे 1/1, धर्ममधर्म 18/31, अधर्म धर्ममिति 18/32, धर्मकामार्थान् 18/34).
- कुलमर्यदायाः वाचकोऽयं शब्दः (कुलधर्माः 1/40,43,44)
- स्वकर्त्तव्यरूपकर्मणः वाचकोऽयं शब्दः ( धर्मसम्मुढचेताः 2/7, परधर्मो 3/35, स्वधर्मो 18/47 )
- बुद्धेः समतारूपस्य वाचकोऽयं शब्दः (स्वल्पमप्यस्य धर्मस्य 2/40 )
- सद्गुण सदाचारस्य च वाचकोऽयं शब्दः ( यदा यदा हि धर्मस्य 4/7,8, धर्माविरूद्धो 7/11, शाश्वतधर्मगोप्ता 11/18 )
- ज्ञानविज्ञानयोः वाचकोऽयं शब्दः ( अश्रद्धधानाः पुरूषा धर्मस्यास्य परन्तपः 9/3)
- सकामानुष्ठानस्य वाचकोऽयं शब्दः ( त्रयीधर्ममनुप्रपन्ना 9/21 )
- एकत्वभावब्रह्मसत्तयाः वाचकोऽयं शब्दः ( सर्वधर्मान् परित्यज्य मामेकं शरणं ब्रज 18/66 )

धर्मस्य व्युत्पत्तिः साधारणतः त्रिधा दृश्यते – प्रथमतो ध्रीयते लोकोऽनेन, द्वितीयतो धरति वा लोकं, तृतीयतो ध्रीयते लोकयात्रानिर्वाहार्थं योऽसौ धर्मः । महाभारते -

धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः ।
तस्माद् धारणसंयुक्तं स धर्म इति निश्चयः ।। इति ।।[6]

अर्थात् धर्मः समाज-धारण-संरक्षण-संवर्धनादि श्च करोति, धर्मः समाजकल्याणकारिणां जीवनयापनपद्धतिं निर्दिशति । पाश्चात्त्यानां रिलिजन्' इति शब्देन धर्मशब्दस्य अभिप्रायं करोति । पाश्चात्यानां धर्मशब्दः केवलं उपासनापद्धतिं निर्दिशति । धर्मः मानवस्य कल्याणं विदधाति तथा व्यक्तेः विकासपुरःसरं दरीदृश्यते ।

मनस्मृतौ - आचारः परमो धर्मः[7] । हारीतेनापि धर्मस्य स्मृतिप्रमाणिकत्वमङ्गिकृतम् – श्रुतिप्रमाणको धर्मः[8] । महाभारतानुसारेण - अहिंसा परमोधर्मः।[9]

मानवजीवनस्याधिकारः कर्त्तव्यम्, अनुशासनम्, आचारणञ्च धर्मशब्देण बोध्यते । सकलशास्त्रभूतोऽयं वेदो धर्मस्य मूलं भवति । धर्मो भारतीयसंस्कृतेः परिपूरकः परिपोषकश्चेति विदुषां मतम् । तस्मात् भारतीयसंस्कृतेः संरक्षणाय धर्मस्य पालनं कर्त्तव्यम् । स च धर्मः कीदृश इति जिज्ञासायां पण्डितैः विभिन्नेषु धर्मशास्त्रीयग्रन्थेषु चर्चितः ।

प्रथमं तावत् मनुस्मृतौ भगवता मनुना धर्मस्य लक्षणं कृतम् यत् –

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागाभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत । इति ।।[10]

पुनः मनुः धर्मस्य दशलक्षणात्मकं उल्लेखं करोति-

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।[11]

अपि च-

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥[12]

तत्र विष्णुधर्मसूत्रे उक्तम् –

क्षमा सत्यं दमः शौचं दानमिन्द्रियनिग्रहः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम् ।
अनभ्यसूया च तथा धर्मसामान्यमुच्यते ॥[13]

सूत्रकारेण गौतमेन वेदो धर्ममूलम्, तद्विदां च स्मृतिशीले इति स्वकीयसूत्रग्रन्थे लिखितम् । अस्य टीकाकारेण हरदत्तेनापि - कर्मण्याभ्युदयनिःश्रेयस-हेतुरपूर्वाख्य आत्मगुणो धर्मः इत्युक्तम् । वैशेषिकशास्त्रममज्ञः कणादो वदति यत् - यतोऽभ्युदयनिःश्रेयस सिद्धिः स धर्मः[14] । वशिष्ठेन स्वरचितसूत्रस्य प्रथमाध्याये सप्तमसूत्रे – अगृह्यमाणकारणो धर्म।[15] इति । पूर्वमीमांसासूत्रकारेण महर्षिजैमिनिना चोदनालक्षणोऽर्थो धर्मः[16] इति विहितम् । चोदना नाम क्रियायाः प्रवर्तकं वचनम् तया लक्षितो योऽर्थः स एव धर्मः । श्रीमद्भागवतपुराणेऽपि धर्मस्य मूलत्वेन वेदस्य प्राधान्यमङ्गीकृत्य वेदप्रणाणीभूतः धर्मः ।.

श्रुतिः स्मृतिः सदाचार आत्मतुष्टिश्चेति चत्वारि प्रमाणानि भवन्ति धर्मस्य । श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति ।[17] अर्थात् श्रुतिर्नाम वेदः, स्मृतिर्नाम धर्मशास्त्रम् । सतामर्थात् शिष्टानामाचारः सदाचारः । एतद् विषये मनुनोक्तं यत् –

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।।[18]

धर्मस्य विभाजनप्रसङ्गे पण्डितैः भिन्नः प्रकारेण चर्चितः । धर्मशास्त्राधारेण धर्मः तु द्विविधा श्रौतः स्मार्त्तश्चेति । श्रौतधर्मेषु यागादयोऽन्तर्भवति ।

महाभारतानुसारं धर्मस्त्रिविधः –
वेदोक्त परमो धर्मः स्मृतिशास्त्रमतोऽपरः ।
शीष्टाचीर्णः परः प्रोक्तस्त्रयो धर्माः सनातनः ।।[19]

यथा – वेदप्रतिपादितधर्मः, स्मृतिप्रतिपादितधर्मः, शिष्टजनानामाचारश्चेति । परन्तु अयं धर्मः बहुविधोऽपि भविष्यपुराणे षोढा प्रदर्शितः । अपि च मिताक्षराकारेण भगवता विज्ञानेश्वराचार्येण स्मार्त्तधर्मोऽपि षोढा विभक्तः । यथा वर्णधमः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः साधारणधर्मश्चेति ।

भारतीयविचारानुसारं धर्मस्य उद्देश्यं भवति व्यक्तेः उन्नतिः तथा समाजस्य कल्याणसाधनम् । येन समाजस्य कापि हानिः न स्यात् । एतादृशः व्यवहारः एव नीतिमूल्यानि इति अभिधानं प्राप्नोति । अथ समाजजीवनस्य मूले तथा समाजधारणार्थं निर्मितार्थं धर्मतत्त्वस्य आवश्यकता वर्तते । स्वाध्यायः, देवतार्चनम्, यागादीनाम् अनुष्ठानम्, मातापित्रोः तथा आचार्यस्य पूजनम्, बलिहरणं, अतिथिसत्कारः तीर्थयात्रा इत्यादयः उपायाः तदर्थं निर्दिष्टाः । एतद्विधेन धर्माचरणेन समाजधारणमवश्यमेव सुकरं स्याद् इत्यत्र न संशयः ।

धर्मं विना समाजस्य धारणा अनया प्रक्रियया सुचारुतया सम्पद्यते इत्यत्र न संशयः । व्यक्तेः तथा समाजकल्याणसाधनार्थं, चतुर्णां वर्णानां चतुर्णां आश्रमाणां तथा चतुर्विधपुरुषार्थानां विधानस्य कृते शास्त्रकारैः धर्मस्य प्रासङ्गिकता प्रकटीकृता ।

सन्दर्भः -

1.पाणिनीयधातुपाठः भ्वादि 629.
2. अ. वे.11.9.94.
3.छा. उ 2.23.1
4. अमरकोषः
5. वामनशिवराम आप्टे-संस्कृत-हिन्दी-कोष
6. महा.कर्ण 69.58
7.मनुसंहिता- 1.109.
8. हारीतेन स्मृतिशास्त्रम्
9.महाभारतम्, पद्मपुराणम्- 31.27
10. मनुसंहिता 2.1
11. मनुसंहिता 6.91

12. मनुसंहिता 10.62
13. विष्णुधर्मसूत्रम्
14. कणादसूत्रम्
15. वशिष्टसूत्रम्
16. मीमांसासूत्रम्
17. मनुसंहिता 2.10 .
18. मनुसंहिता 2.6
19. म.भा.191.65

ग्रन्थसूची-


- जायसवाल, सुरेश, मनुस्मृति, साधना पाब्लिकेशन्स, दिल्ली, 2005.
- बन्धु, मनुदेव, उपनिषद् वाङ्मय में योगविद्या, प्रतिभा प्रकाशन, दिल्ली, 2010.
- चतुर्वेदी, सत्यदेवनिगमालंकार, धर्म दर्शन एवं संस्कृति, प्रतिभा प्रकाशन, दिल्ली, 2013.
- श्रीमद्भगवद्गीता, गीताप्रेस, गोरक्षपुर ।
- दाश, पार्थप्रतिम, आधुनिकसमाजे संस्कृतस्योपयोगिता, संस्कृत बुक डिपो, कलकाता, 2015.